শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱরাহপুরাণে রৈভ্য ৰিরচিতম্

॥ শ্রী গদাধরস্তোত্রম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী গদাধরস্তোত্রম্ ॥

রৈভ্য উৱাচ

গদাধরং ৰিবুধজনৈরভিষ্টুতং
ধৃতক্ষমং ক্ষুধিতজনাঽর্তিনাশনম্।
শিৱং ৰিশালাঽসুর সৈন্যমর্দনং
নমাম্যহং হৃতসকলাঽশুভং স্মৃতৌ॥ **1**॥

পুরাণপূর্ৱং পুরুষং পুরুষ্টুতং
পুরাতনং ৰিমলমলং নৃণাং গতিম্।
ত্রিৰিক্রমং হৃতধরণিং বলোর্জিতং
গদাধরং রহসি নমামি কেশৱম্॥ **2**॥

ৰিশুদ্ধভাৱং ৰিভৱৈরুপাৱৃতং
শ্রিযাৱৃতং ৰিগতমলং ৰিচক্ষণম্।
ক্ষিতীশ্ৱরৈরপগতকিল্বিষৈঃ স্তুতং
গদাধরং প্রণমতি যঃ সুখং ৱসেৎ॥ **3**॥

সুরাঽসুরৈরর্চিতপাদপঙ্কজং
কেযূরহারাঙ্গদমৌলিধারিণম্।
অব্ধৌ শযানং চ রথাঙ্গপাণিনং
গদাধরং প্রণমতি যঃ সুখং ৱসেৎ॥ **4**॥

সিতং কৃতে ত্রৈতযুগেঽরুণং ৰিভুং
তথা তৃতীযে নীলসুৱর্ণমচ্যুতম্।

কলৌ যুগেঽলিপ্রতিমং মহেশ্বরং
গদাধরং প্রণমতি যঃ সুখং রসেৎ॥ **5**॥

বীজোদ্ভবো যঃ সৃজতে চতুর্মুখং
তথৈব নারাযণরূপতো জগৎ।
প্রপালযেদ্রুদ্ররূপস্তথাঽন্তকৃৎ
গদাধরো জযতু ষডর্ধমূর্তিমান্॥ **6**॥

সত্ত্বং রজশ্চৈব তমো গুণাস্ত্রযঃ
ত্বত্তেষু বিশ্বস্য সমুদ্ভবঃ কিল।
স চৈক এব ত্রিবিধো গদাধরো
দধাতু ধৈর্যং মম ধর্মমোক্ষযোঃ॥ **7**॥

সংসারতোযার্ণবদুঃখতন্তুভিঃ
বিযোগনক্রক্রমণৈঃ সুভীষণৈঃ।
মজ্জন্তমুচ্চৈঃ সুতরাং মহাপ্লবো
গদাধরো মামুদধৌ তু যোঽতরৎ॥ **8**॥

স্বযং ত্রিমূর্তিঃ খমিবাত্মনাত্মনি
স্বশক্তিতশ্চাণ্ডমিদং সসর্জ হ।
তস্মিঞ্জলোত্থাসনমাপ তৈজসং
সসর্জ যস্তং প্রণতোঽস্মি ভূধরম্॥ **9**॥

মৎস্যাদিনামানি জগৎসু চাশ্নুতে
সুরাদিসংরক্ষণতো বৃষাকপিঃ।
মুখস্বরূপেণ স সন্ততো বিভুঃ
গদাধরো মে বিদধাতু সদ্গতিম্॥ **10**॥

এতচ্চ রৈভ্যনির্দিষ্টং
স্তোত্রং বিষ্ণোর্গদাভৃতঃ।

যঃ পঠেৎস গযাং গৎরা
পিণ্ডদানাদ্বিশিষ্যতে ॥ **11** ॥

॥ শ্রী গদাধরস্তোত্রং সমাপ্তম্ ॥